"यथा दारुमयी योषा नटादीनां प्रचेष्टते ।
तथा स्वकर्म्मवशगो देही सर्व्वत्र वर्त्तते ॥")

योषित्, स्त्री, (योषति पुमांसं युष्यते पुंभिरिति वा । युष् + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) नारी । इत्यमरः । २ । ६ । २ ॥ (यथा, मेघदूते । १ । ३९ ।
"गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")
तस्या अवध्यत्वं यथा, वह्निपुराणे ।
"तं प्रेक्ष्य भरतं श्रेष्ठं शत्रुघ्नो वाक्यमब्रवीत् ।
अवध्याः सर्व्वभूतानां योषितः क्षम्यतामिति ॥"

योषित्प्रिया, स्त्री, (योषितां प्रिया ।) हरिद्रा । इति भावप्रकाशः ॥

योषिता, स्त्री, (योषित् + टाप् ।) नारी । यथा,
"स्त्री वधूरबला नारी प्रिया रामा जनिर्ज्जनी ।
योषा योषिद्योषिता च जोषिज्जोषा च
जोषिता ॥"
इति शब्दरत्नावली ॥
(यथा, मुण्डकोपनिषदि । २ । १ । ५ ।
"तस्मादग्निः समिधो यस्य सूर्य्यः
सोमात् पर्ज्जन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥")

यौक्तिकः, पुं, (युक्तिं करोतीति । युक्ति + ठञ् ।) नर्म्मसचिवः । इति शब्दरत्नावली ॥ युक्तियोग्ये, त्रि ॥

यौगकः त्रि, (योगस्यायमिति । योग + अण् + स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

यौगिकः, त्रि, (योगाय प्रभवतीति । योग + "योगाद्यच्च ।" ५ । १ । १२९ । इति ठञ् ।) प्रकृतिप्रत्यययोगलभ्यार्थवाचकः । यथा । योगाय प्रभवति । इति योग्यः यौगिकः । इति सिद्धान्तकौमुदी ॥ "योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा । आदितेयादिशब्दा यौगिकाः अदितेरपत्यानीति ढक्प्रत्ययेन केवलं योगार्थ एव ।" इत्यलङ्कारकौस्तुभे १ किरणः ॥ * ॥ ("यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासस्तद्धितान्तश्च कृदन्तश्चेति तत्त्रिधा ॥'
यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रतिहेतुस्तन्नाम तादृशार्थे यौगिकम् । योगरूढन्तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढार्थस्य बोधकं न तु तन्मात्रस्य । तच्च यौगिकं त्रिविधं समासस्तद्धितान्तं कृदन्तञ्चेति । द्वन्द्वोऽपि समासः स्वघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिराद्यर्थस्यान्वयबोधकतया यौगिक एव । सर्व्वञ्चेदं रूढान्यत्वेन विशेषणीयं नातः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढेऽतिप्रसङ्गः । ब्राह्मणी श्वश्रूः शूद्रेत्यादौ ङीबादेः स्त्रीत्ववाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव नातो विभागस्य व्याघातः ॥ यौगिकेषु समासं लक्षयति ।
'यादृशस्य महावाक्यस्यान्तस्थादिर्निजार्थके ।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
यादृशमहावाक्योत्तरस्थतलादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयताशालिबोधे हेतुस्तादृशं तदाद्यं तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्ताद्यर्थकं वाक्यमपि स्वघटकानेकनामलभ्यतादृशार्थकत्वविरहान्न महावाक्यम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यम् । तेन उपकुम्भादौ नाव्याप्तिर्नवा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः । चौरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नतदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात् । राज्ञः पुरुषत्वमित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः । पायंपायमित्यादिणमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रक्षाय्येत्यादौ समासव्यपदेशोऽव्ययादिशब्दसंस्कारप्रयोजनको गौणः ॥"

* * * * * *

"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
'यन्नाम तद्धितं यच्च यत्क्रमं तद्यदर्थकम् ।
यद्द्वयं यत्क्रमं तच्च तद्धितान्तं निगद्यते ॥'
यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं वा प्रत्येकं बहुगुडो द्राक्षेत्यादौ दाक्षिरित्यादौ चाव्यापकमेव तद्धितान्ते नाम्नि तथापि यादृशं नाम यच्च तद्धितं यादृशानुपूर्व्यवच्छिन्नं यदादृशार्थस्यान्वयबोधे समर्थं तादृशानुपूर्व्यवच्छिन्नं तद्द्वयमपि तादृशार्थे तद्धितान्तं नामेत्यर्थः पचतितरामित्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं यश्चेति पठनीयं टाबादेरपि तद्धितलोपगमादजाश्राद्धीत्यादेर्नासंग्रह इति वदन्ति ।
कृदन्तं नाम लक्षयति ।
'यद्धात्वर्थान्वितस्वार्थधीकृत् कृद्यादृशं भवेत् ।
तद्धातूत्तरगं तत् कृत् कृदन्तं नाम तादृशम् ॥'
यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानुपूर्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारणं तद्धातूत्तरगं तत् कृदेव तादृशानुपूर्व्यवच्छिन्नं सत् कृदन्तं नाम । यथा पाठकपाच्यमानादि तद्धि धात्वर्थेनान्वितस्य स्वार्थकर्त्रादेः कर्म्मत्वाद्यन्वयबोधं प्रति द्वितीयाद्यंशे तादृशानुपूर्व्विकत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिष्टसाधनत्वादिकं बोधयदपि तव्यादिकं धात्वर्थनिष्ठविषयतानिरूपितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थकमेव भावकृतामपि स्वरूपार्थकत्वं व्युत्पादितमेव ॥" इति शब्दशक्तिप्रकाशिका ॥) अगुरुः । तत्पर्य्यायो यथा,—
"अयोगुरुः समुद्दिष्टो यौगिको लोहनामभिः ॥"
इति गारुडे २०५ अध्यायः ॥)

यौजनशतिकः, त्रि, (योजनशतं गच्छतीति । योजनशत + "क्रोशशतयोजनशतयोरुपसंख्यानम् ।" ५।१।७४। इत्यस्य वार्त्ति० इति । ठञ् ।) योजनशतगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥ (योजनशतादभिगमनमर्हतीति वाक्ये योजनशताभिगमनकर्त्ता । इति काशिका ॥)

यौजनिकः, त्रि, (योजनं गच्छतीति । योजन + "योजनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।) एकयोजनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

यौट, ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौटत् । यौटति काष्ठं तक्षा । इति दुर्गादासः ॥

यौड, ऋ सम्बन्धे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौडत् । यौडति काष्ठं तक्षा । इति दुर्गादासः ॥

यौतकं, क्ली, (युतकयोर्वधूवरयोरिदम् । युतक + अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतुकम् । इति हलायुधरायमुकुटौ । २ । ८ । २८ ॥ (यथा, मनुः । ९ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव
सः ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)

यौतवं, क्ली, परिमाणम् । इत्यमरः । २ । ९ । ८५ ॥

यौतुकं, क्ली, यौतकम् । विवाहकाले दम्पत्योर्लब्धं धनम् । उपचारात् अन्नप्राशनादिसंस्कारकाललब्धमपि । युतकं योनिसम्बन्धः तत्र भवमिति अणि यौतकम् । युतयोर्वधूवरयोरिदमिति वा कणि यौतकम् ॥ यौतकमुकारमध्यमपि । यौतकं यौतुकञ्च तत् । इति वाचस्पतिः ॥ यौतकादि तु यद्देयं स दायो हरणञ्च तदित्यमरटीकायां भरतः ॥ * ॥ स्त्रिया यौतकधनस्याधिकारक्रमो यथा,—
"यत्तु दुहितृमात्राधिकारार्थं गौतमवचनम् ।
'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च ।'
यच्च नारदस्य ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ॥'
यच्च कात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्त्रेषु तद्भवेत् ॥'
यच्च याज्ञवल्क्यस्य ।
'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥'
तानि पूर्व्वोक्तदेवलवचनविरोधेन यौतकधनमात्रविषयाणि । अतएव मनुः । ९ । १३१ ॥
'मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥'
यौतकं परिणयनलब्धम् । यु मिश्रणे इति धातोर्युत इति पदम् । मिश्रता च स्त्रीपुंसयोरेकशरीरता तच्च विवाहाद्भवति । अस्थिभिरस्थीनि मांसैर्म्मांसानि त्वचा त्वचमिति श्रुतेः । अतो विवाहकाललब्धं यौतकम् । ततश्च परिणयनलब्धं स्त्रीधनं दुहितुरेव न पुत्त्राणाम् । तत्रैव